No. १५२८ क

Title भुवनेश्वरी पञ्चाङ्गम्

Author

Extent ४६ पत्र Age

Subject तन्त्र

४४

नं ४६८

भुवनेश्वरीपंचांग

भुवनेश्वरीपंचांग

नं. १५१८

10

HF 5949

Pages 63

37

Double

F — 6

Total # 37
+ 3
+ 6

46

Complete


श्री रणवीर पुस्तकालय
मंदिर श्री रघुनाथ जी

भु॰
पट॰
१

ॐ श्रीगणेशाय नमः श्रीदेव्युवाच देवदेव महादेव यद्यहं प्रीयसी तव
पटलं भुवनेश्वर्यास्तज्जायामे प्रकाशय श्रीभैरव उवाच अथातः संप्रवक्ष्या
मि देवि गुह्यात्तमोत्तमं येन विज्ञानमात्रेण साधको भैरवो भवेत् एकाक्ष
री महाविद्या श्रीविद्या भुवनेश्वरी चतुर्दशात्मिका विद्या तथा च षोड
शात्मिका मंत्रविद्यात्मिका देवी महारत्नेश्वरीति च विद्येयं भुवनेश्व
र्याः प्रभावसहिता कलौ स्वर्गभोगप्रदा चैव राज्यभोगप्रदा तथा सकृ
उच्चारिता विद्या ब्रह्महत्यां व्यपोहति सर्वसौख्यप्रदा देवी लोके सौभा
ग्यदायिनी अस्याः स्मरणमात्रेण सिद्धयोऽष्टौ करे स्थिताः दुर्भगा सुभ
गा नूनं दुःखिता सुखिता भवेत् वंध्यापि लभते पुत्रं स्ववंशपरिवर्धनं
निर्धनो धनमाप्नोति मूको वाचमवाप्नुयात् मूर्खोऽपि हीनचेतस्कः सुविद्य
त्वमवाप्नुयात् यां यां प्रार्थयते सिद्धिं हठात्तां तामवाप्नुयात् देवि सिद्धि
र्भवेत्तस्य जरामरणवर्जिता विधानं च प्रवक्ष्यामि शृणु देवि यथाक्रमं
ब्राह्मे मुहूर्ते उत्थाय साधको भक्तिसंयुतः प्रक्षाल्य पाणिपादौ च स्वासने
परिसंविशेत् स्वशिरःस्थं गुरुं शांतं ध्यायेत् नामपूर्वकं सप्रियं तन्म तुर्जे
मास्ततात्स्तोत्रेणैव तथा तदा तां शिरसा लब्ध्वा ध्यायेत् कुंडलिनीं ततः
नामारोहावरोहेण क्रमेण परिभाव्य च जप्त्वा स्वमंत्रं च ततो जपं तेच वा
हिस्ततः गच्छेत् मलशौचादिकं कृत्वा दंतधावनमाचरेत् नदीतीरं ततो गत्वा
स्नानसंध्यादिकं चरेत् गृहीत्वा जलकुंभं वेश्म हे यायात्समर्चयेत् द्वार
पालान् प्रविश्यान्तः स्वासने शोधयेत्सुधीः स्वीकृत्य संविदं कृत्वा भूताप
सरणं ततः गुमानानंदसंयुक्तः प्राणायामत्रयं चरेत् भूतशुद्धिं ततः
कृत्वा प्राणप्रतिष्ठाविधिं ततः ततः रक्षादिकं कृत्वा मातृकान्यासमाच
रेत् सारस्वतेन मार्गेण दशधा सर्वसिद्धये साधको मूर्तिन्यासांश्च षो
ढान्यासं ततः परं मंत्रन्यासं ततः कुर्यात् देवताभावसिद्धये स्वहृल्लेखामू
र्ध्वं वदने गगनो हृदयां गुजे रथांकर्णे लिकांगुह्ये महोष्ठ पायदहये
ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु च संध्यादि हृल्लेखा बीजाढ्यान्यस्त

व्याभ्रूतसंप्रभाः अंगानि विन्यसेत्सम्यग्जातियुक्तानि षट्क्रमात्
ब्रह्माणं विन्यसेद्भाले गायत्र्या चैव संयुतं सावित्र्या सहितं विष्णुं कपो-
ले दक्षिणे न्यसेत् वागीश्वर्या समायुक्तं वामगंडे महेश्वरं श्रिया धनप-
तिं न्यसेन्महामकर्णाग्रके पुनः रत्या स्मरं सुखे न्यस्य पुष्ट्या गणपतिं न्यसेत्
सव्यकर्णोपरि नथीकर्णागंडांतरालयोः न्यस्तव्यो वदने मूले पुनः चै-
तन्नतां न्यसेत् कंठमूले स्तनद्वंद्वे वामांसे हृदयांबुजे सव्यांसे पार्श्वयु-
गले नाभिदेशे चैदेशिकः भाले स पार्श्वे जठरे पार्श्वांसककटि हृदि ब्र-
ह्माण्या धास्तु तेनो न्यस्या विधिना प्रोक्तलक्षणाः मूलेन व्यापकं देहे पीठ-
न्यासं ततश्चरेत् पुनश्च व्यापकं देहे स्पृश्य देवीं विचिंतयेत् उद्यद्दिनद्युतिः
मिंदुकिरीटां तुंगकुचां नयनत्रययुक्तां स्मेरमुखीं वरदांकुशपाशाभी-
तिकरां प्रभजे भुवनेशीं १ अन्यच्च सिंदूरारुणविग्रहां त्रिनयनां माणिक्य-
मौलिस्फुरन्नारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां पाणिभ्यां
मणिपूर्णरत्नचषकं संबिभ्रतीं शाश्वतीं सौम्यां रत्नघटस्थसव्यचरणां
ध्यायेत्परामंबिकां २ अन्यच्च श्यामांगीं शशिशेखरां निजकरैर्दधत्तं च रक्तो-
त्पलं रत्नाढ्यं चषकं शरणं भयहरं संबिभ्रतीं शाश्वतीं मुक्ताहारलसत्पयोध-
रनतां नेत्रत्रयोल्लासिनीं वंदे हं सुरसज्जितां हरवधूं रक्तारविंदस्थितां ३
अन्यच्च उद्यच्चंद्रसहस्ररश्मिसदृशीं वह्न्यंबुसूर्येक्षणां मायच्छ्रीध्वविद्ये-
र्णितेक्षणयुगां वीणारवाघ्याकुलां मालापुस्तकपीयुपात्रकमलान्दोर्भि-
र्वहंती सदा ध्यायेद्भुवनेश्वरीं शवगतां शर्वादिदेवैस्तुतां ४ अन्यच्च ।
सरोजनयनां चलत्कनककुंडलं पीशवी पत्रजंपवटीकरां उदितसू-
र्यकोटिप्रभां शशांककृतशेखरां शवशरीरसंस्थां शिवां स्मरामि भु-
वनेश्वरीं विमुखवाङ्मुखस्तंभिनीं ५ अन्यच्च वीणावादनतत्परां त्रि-
नयनां त्रैलोकरक्षापरां माध्वीपानपरायणां शवगतां मंदस्मितां चि-
न्मयीं मायावीजविभूषितां शशिकलाचूडां चलत्कुंडलां ध्यायेद्भु-
वनेश्वरीं भगवतीं शर्वेण संसर्जितां ६ इति ध्यात्वा हृदयांभोजे देवीं ।

भु॰
प॰
२
2

श्रीभुवनेश्वरीं मानसैरुपचारैश्च पूजयित्वा यथाविधिः कृत्वान्तर्यज
नं देवि सामान्यार्घ्यं ततश्चरेत् चटपूजादिकं कृत्वा यंत्रपूजां समाचरेत्
यंत्रोद्धारं प्रवक्ष्यामि शृणु देवि फलप्रदं यंत्रं मंत्रं तथा पूजां गुप्तं गोप्य
तमं कुरु त्रिकं षट्कोणमष्टपत्रं नागपत्रं च षोडश वृत्तं च चतुर्द्वारयुक्तं
यंत्रोद्धारमिदं प्रिये अथवान्यप्रकारेण कथयामि सुविस्तरं पद्ममष्ट।
दलं वा स्यात्पद्मं षोडशभिर्दलैः विलिखेत्कर्णिकामध्ये त्रिकं षट्कोण।
सुंदरं चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत् ततः संपूजयेत्पीठं नव।
शक्तिसमन्वितं जयाख्या विजया पश्चादजिता चापराजिता नित्या विला
सिनी दोग्ध्री त्वघोरा मंगला नव सर्वशक्तिपदं प्रोच्य ङेंतं च कमलास
ने नमः इत्यासनेन पूज्य तत्र ह्रीजादिकं प्रिये बीजाद्यमासनं दत्वा मूर्तिं
तेनैव कल्पयेत् तस्यां संपूजयेद्देवीमावाह्य वरणैः क्रमात् मध्यम
प्राग्याम्यसौम्यपश्चिमेषु यथाक्रमं ह्ल्लेखाद्याः समभ्यर्च्याः पंचभूत
समप्रभाः वरपाशांकुशाभीति धारिण्योमितभूषणाः आग्नेय्यादिषु
स्थानेषु पूजयेदंगदेवताः त्रिकं संपूज्य षट्कोणे यजेन्मिथुनदेवताः
इंद्रकोणे लसद्दंडकुंडिकाक्षगुणाभयात् गायत्रीं पूजयेन्मंत्री ब्रह्माण
मपि तादृशं रक्षःकोणे चक्रशंखगदापंकजधारिणीं सावित्रीं पीतव।
सनां यजेद्विष्णुं च तादृशं वायुकोणे परशुस्तमालाभयवरान्वितां
यजेत्सरस्वतीं मह्य्यां रुद्रं तादृशलक्षणं वह्निकोणे यजेद्रत्नकुंभरत्न
कमंडुले कराभ्यां बिभ्रतं पीनं तुंदिलं धनदायकं आलिंग्य सव्यहस्ते
न वामेनांबुजधारिणीं धनदांकसमाश्लिष्टां महालक्ष्मीं प्रपूजयेत्
वारुणे मदनं बाणपाशांकुशशरासनं धारयंतं जपारक्तं पूजयेद्र
क्तभूषणं सव्येन पतिमाश्लिष्य वामेनांबुजधारिणीं पाणिना रमणां
कस्थां रतिं सम्यक्तमर्चयेत् ईशाने पूजयेत्सम्यग्विघ्नराजं प्रियान्वितं
रुणि पाशधरं कांतावरांगस्थकरांगुलिं माध्वीपूर्णकपालाढ्यं विघ्न
राजं दिग्वरं पुष्करे विगलद्रत्नस्फुरद्रत्नघटकधारिणं सिंदूरसदृ

शाकारांकुशदाममदविभ्रमां रक्तरक्तोत्पलामन्यपाणिना तन्मुखं स्पृ
शे आम्रिष्ठकांतामरुणां पुष्पिसर्वेद्विगंवराम् कर्णिकायां निधी
यज्यो षट्कोणस्थाथ पार्श्वयोः अंगानि केसरेष्वेताः पश्चात्पत्रेषु पू
जयेत् अनंगकुसुमा पश्चादनंगकुसुमातुरा अनंगमदनाद्वद्वदनंग
मदनातुरा भुवनपाला गगनवेगा चैव ततः परं शशिरेखा च गगन
रेखा चैवाष्टशक्तयः पाशांकुशवराभीतिधारिण्योरुणविग्रहा त
तः षोडशपत्रेषु करालीविकरालमा सरस्वती श्री दुर्गे षालक्ष्मी श्रु
तिस्मृतिधृतिः श्रद्धामेधामतिकीर्ति षोडशशक्तयः खड्गखे
टकधारिण्यः श्यामाः पूज्याश्च मातरः येन्द्राद्यैर्हिः समभ्यर्च्याः शक्त
यः परिवारिकाः प्रथमानंगरूपा स्यादनंगमदना तथा मदनातुरा
भुवनवेगा तथा भुवनपालिका स्यात्सर्वमदनानंगवेदनानंगमेखला
चषकं तालवृन्तं च तांबूलं छत्रमुज्ज्वलं चामरं चांशुकं पुष्पं विभ्राणाः
करपंकजैः सर्वाभरणसंदीप्तांशुरूपंक्तित्रयं यजेत् सर्वाभरणसंदी
प्ता लोकपालान्बहिर्यजेत् वज्रादीनपि तद्बाह्ये देवीमित्थं प्रपूज ।
येत् इत्थं संपूज्य देवेशि पुनर्विदोप्रपूजयेत् आसनाद्यैरुपचारैः
नानानैवेद्यसंयुतैः ततो होमविधिं कुर्याद्बटुकादीन् तर्पयेत् त्र्यक्षा
दिकं पुनः कृत्वा जपं कुर्याद्यथाविधिः पठित्वा कवचं नामसहस्रं स्तो
त्रमेव च गुह्येति मंत्रराजेन फलं समर्पयेत्ततः पात्राण्युत्साद्य विधि
वदितः स्तवं ततः पठेत् गुरुस्तोत्रं पुनर्जप्त्वा पात्रवंदनमाचरेत् व
हिर्गत्वा समभ्यर्च्य संतर्प्य क्षिप्रभैरवं पूजागृहं समागत्य शांति
स्तोत्रं पठेत्ततः श्रीवीरवंदनस्तोत्रं पठित्वा हृदयाम्बुजे देवीमुद्वास्य
विहरेद्यथावत्साधकोत्तमः इत्येष पटलो देवि पूजायाः सर्वसाधनः
गुह्याद्गुह्यतमो देवि गोपनीयः स्वयोनिवत् इति श्रीभुवनेश्वरीरहस्ये
पूजाविधिर्नाम पटलं समाप्तम् ॥

2
3



भु. प. १

श्रीगुरवेशिवायोंनमः श्रीगणपतयेनमः श्रीभैरव
उवाच ॐअधुनापद्धतिंवक्ष्येह्यहोरवार्चनसंयुतां
गद्यपद्यमयींगोप्यांसकलागमनिश्चितां प्रातःकृ
त्वासकृत्वातुयोदेवींभक्तितोर्चयेत् तस्यपूजातु।
विफलाशौचहीनायथाक्रिया। ततःश्रीमान्नाथको
ब्राह्मेमुहूर्तेशयनतलादुत्थायकरचरणादिप्रक्षा
ल्य निजासनेसमुपविश्य निजशिरसि श्वेतवर्णो।
धोमुखसहस्रदलकमलकर्णिकांतर्गतचंद्रमंड
लसिंहासनोपरि निषण्णं स्वगुरुंमुक्तवर्णंमुक्ता
लंकारभूषितं ज्ञानानंदमुदितमानसंसच्चिदानंद
विग्रहं त्रिनयनंचतुर्भुजंज्ञानमुद्रापुस्तकवराभ
यकरं वामांगेवामहस्तधृतकमलयारक्तवसनाभ
रणया स्वशक्त्यादक्षभुजेनालिंगितं सर्वदेवदेवप
रमशिवस्वरूपंशांतंसुप्रसन्नंध्यात्वा तच्चरणकम
लयुगलविगलदमृतधारयास्वात्मानंप्लुतंविभाव्य
मानसोपचारैराराधयेद्यथा लंपृथिव्यात्मकंगंधं
समर्पयामिनमः हंआकाशात्मकंपुष्पंसमर्पया
मिनमः यंवाय्वात्मकंधूपंसमर्पयामिनमः रंवह्न्या
त्मकंदीपंसमर्पयामिनमः वंअमृतात्मकंनैवेद्यं
समर्पयामिनमः संसर्वात्मकंफलमूलतांबूलादि

कं समर्पयामि नमः इत्थं सम्मभ्यर्च्य ॐ ऐं ह्रीं श्रीं ह्सख्फ्रें ह्
सक्षमलवरयूं सहखफ्रें सहक्षमलवरयूं ह्सौः श्रीम
च्छ्री

इति दशधा विमृश्य ॐ सहस्रदलपंकजे सक
लशीतरश्मिप्रभं वराभयकराम्बुजं विमलगंधपुष्पांबरं
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं स्मरेच्छिरसि हंसगं
तदभिधानपूर्वं गुरुं इति ध्यात्वा तत्प्रणाममंत्रं यथा ॐ न
मामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपिणं शिरसा योगपीठ
स्थं मुक्तिकामार्थसिद्धये १ श्रीगुरुं परमानंदं वंदाम्यानंद
विग्रहं यस्य सान्निध्यमात्रेण चिदानंदायते परं २ अखंड
मंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं येन तस्मै श्रीगुरवे
नमः ३ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मी
लितं येन तस्मै श्रीगुरवे नमः ४ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः सा
क्षान्महेश्वरः गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ५ नमस्ते
नाथ भगवन् शिवाय गुरुरूपिणे विद्यावतारसंसिद्ध्यै स्वी
कृतानेकविग्रह ६ नवाय नवरूपाय परमार्थैकरूपिणे सर्वा
ज्ञानतमोभेदभानवे चिद्घनाय ते ७ स्वतंत्राय दयाक्लृप्तविग्र
हाय परात्मने परतंत्राय भक्तानां भव्यानां भव्यरूपिणे ८ वि
वेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशिनां प्रकाशाय
ज्ञानिनां ज्ञानरूपिणे ९ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्य
धः सदा मच्चित्तरूपेण विधेहि भवदासनं १० इति श्रीगुरुं प्र
णम्य स्वप्रमंत्रं विभाव्य मनसा तदाज्ञां गृहीत्वा मूलाधारस्थ

श्रु॰ प॰ २ 2

र्णवर्णचतुर्दलकमलकर्णिकांतर्गत शृंगाटकांतर्गतत्रिको
णपीठोपरि परां शक्तिं कुंडलिनीं सर्पाकारामूर्धस्वयंवी सार्धत्रि
वलयां उद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां विस
तंतुतनीयसीं पंचाशद्वर्णविग्रहां अष्टात्रिंशत्कलारूपिणीं त्रि
धामधामांतं सर्वप्राणिजीवां सर्वदेवाधिदेवीं सकलमंत्रमातरं
स्वमंत्रां विभाव्य श्रीगुरूपदिष्टनिजसहजनादेन सचैतन्यां विभाव्य
तत्र चतुर्दलेषु वंनमः शंनमः षंनमः संनमः इति पत्रेषु मध्ये मूले
न च प्रादक्षिण्येन संपूज्य स्वीकमंत्रेणैव कमलात्कमलं नीत्वा
ततः स्वाधिष्ठाने लिंगमूले विद्रुमवर्णे षट्दलकमले तां नीत्वा
प्रापय्य तत्र वंनमः भंनमः मंनमः यंनमः रंनमः लंनमः इति प
त्रेषु मध्ये मूलेन च संपूज्य ततो मणिपूरके नाभौ नीलवर्णे दश
दलकमले तां नीत्वा तत्र डंनमः ढंनमः णंनमः तंनमः थंनमः
दंनमः धंनमः नंनमः पंनमः फंनमः इति पत्रेषु मध्ये मूलेन च सं
पूज्य ततो वक्षस्यनाहते पिंगलवर्णे द्वादशकमले तां नीत्वा
तत्र कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंन
मः झंनमः ञंनमः टंनमः ठंनमः इति पत्रेषु मध्ये मूलेन च स
मभ्यर्च्य ततो विशुद्धौ कंठे धूम्रवर्णे षोडशदलकमले तां प्राप
य्य तत्र अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠं
नमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अः
नमः इति पत्रेषु मध्ये मूलेन च संपूज्य ततो भ्रूमध्ये आज्ञाचक्रे
विद्युद्वर्णे द्विदलकमले तां नीत्वा तत्र हंनमः क्षंनमः इति प
त्रयोर्मध्येन च संपूज्य ततो ब्रह्मरंध्रगत द्वादशांतचक्रं प्रापय्य

तत्र सहस्रदलकमलकर्णिकांतर्वर्त्तिबिंदुरूपतेजोमयपर
मशिवेन सहैकत्वं नीत्वा ततः स्रवतापरमामृतेन तां संतर्प्य
तत्र नादश्रवणतत्परोऽहंनिलयं विभाव्य ततोऽवरोहे सर्वत्र
सोऽहमिति मंत्रेण कमलात्कमले वारोह्यमाणमात्ता चक्रादि
क्रमेण तेषु तेषु कमलेषु तैस्तैरत्नैः संपूज्यमानां तत्तदाधा
रतत्तद्वाहनतत्तद्गुण तत्तदधिदेवताः संतर्पयंती मूलाधारे श्रा
पय्य तत्रैव स्वस्थाने संस्थापयेत् इत्यारोहावरोहक्रमेण परां श
क्तिं कुंडलिनीं ध्यात्वा गेंप्रकाशमापूर्णा प्रथमे प्रयाणे प्रतिप्रया
णेऽप्यमृतायमानां श्वेतःपद्मामत्र संचरंतीमानंदरूपामवलं
प्रपद्ये इति मत्वा नाहमस्मि न चान्योऽस्मि ध्येयं चात्र न विद्यते आ
नंदपदसंलीने मनः समरसीगतं अहं देवी न चान्योऽस्मि ब्रह्मै
वाहं न शोकभाक् सच्चिदानंदरूपोऽहं स्वात्मानमिति चिंतयेत्
इति संस्मृत्य तत्तेजसा व्याप्तं स्वदेहं विचिंत्य तत्तेजसापरिणतां
श्रीपरदेवतां स्वहृदयकमले ध्यात्वा प्राणायामत्रयं कुर्यात्
तद्विधिर्यथा तत्र विहितपद्मासनो मूलाधारार्पितचित्त
वृत्तिर्मूलं प्रणवं वा षोडशवारमुच्चरन् दक्षांगुष्ठेन दक्षनासा
पुटं निरुध्य वामेन पवनं पूरयेत् ततस्तमेव चतुःषष्टिवार
मुच्चरन् दक्षनासाकनिष्ठाभ्यां वामपुटं च निरुध्य द्वाभ्यां पव
नं कुंभयेत् ततस्तमेव द्वात्रिंशद्वारमुच्चरन् दक्षेण पवनं शनै
रेचयेत् इत्येकः प्राणायामः एवमेव विपर्ययेण क्रियमाणो
द्वितीयः प्रथमवत्तृतीयः तदुक्तं इडयापिब षोडशभिः पव
नं कुंभषष्टिचतुष्टयमंतरगमत्र जपिंगलया शनकैः शनकै

भु. दशभिर्दशभिर्दशभिर्द्वापिकैः इत्थं प्राणायामत्रयेण निर
प. स्तसकलकल्मषस्वदेहं देवताराधनयोग्यं विभाव्य स्वमूलवि
३ द्यायाः ऋष्यादिन्यासं कुर्वीत यथा ॐ अस्य श्रीभुवनेश्वरीमंत्रराज
स्य श्रीदक्षिणामूर्तिरृषिः पंक्तिश्छंदः श्रीभुवनेश्वरी देवता ह्रींबीजं
3 श्रीशक्तिः क्लींकीलकं ममधर्मार्थकाममोक्षार्थे जपे विनियोगः
इति कृताञ्जलिरुच्चार्य न्यसेत् श्रीदक्षिणामूर्तिऋषये नमः शिरसि पं
क्तिश्छंदसे नमो मुखे श्रीभुवनेश्वरीदेवतायै नमो हृदि ह्रींबीजाय नमो
गुह्ये श्रीशक्तये नमः पादयोः क्लींकीलकाय नमः नाभौ धर्मार्थका
ममोक्षार्थे जपे विनियोगः सर्वांगेषु इति ऋष्यादिन्यासः अथ करन्या
सः ॐ ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्यां वषट्
ह्रैं अनामिकाभ्यां हुं ह्रौं कनिष्ठिकाभ्यां वौषट् ह्रः करतलकरपृष्ठा
भ्यां फट् अथ षडंगन्यासः ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं
शिखायै वषट् ह्रैं कवचाय हुं ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्राय फट्
अथ ध्यानं ॐ उद्यद्दिनद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रय
युक्तां स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीं
इति श्रीपरदेवतां निमील्यनयने स्वहृदयकमले स्वाभेदेन ध्या
त्वा मालामादाय ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि च
तुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॐ सिद्ध्यै नमः इति म
नसा गंधादिना संपूज्य गं अविघ्नं कुरु माले त्वं इति पठित्वा यथा
शक्ति जपं विधाय जपांते त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव
शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति हृदि पठित्वा मालां शिर
सि निधाय पुनरपि प्राणायामादि विधाय ॐ गुह्यातिगुह्यगो

श्री त्वं षट्छ्राणामस्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्म
हेश्वरि इत्यनेन तेजोमयं जपं श्रीदेवीवामहस्ते समर्प्य योनि
मुद्रया प्रणमेत् पुनर्नत्वा प्रातःप्रभृति सायांतं सायात्प्रातर्
न्ततः यत्करोमि जगद्योने तदस्तु तव पूजनं इति निजकृत्यं समर्प्य
स्वकार्यानुष्ठानाय ॐ त्रैलोक्यचैतन्यमये सुरेश्वरि श्री सुंदरि त्व
च्चरणात्तयैव प्रातःसमुत्थाय तव प्रियार्थं संसारयात्रामनुव
र्तयिष्ये संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीभुवनेश्वरि देवि
स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवंतु मातः जा
नामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषी स्प
केशि हृदि स्थया यथा यथा नियुक्तोस्मि तथा करोमि इति श्रीदे
व्याज्ञां संप्रार्थ्य मूलाधारादि द्वादशांतचक्रपर्यंतस्थिताभ्यो
गणपतिप्रभृतिदेवताभ्यो गुरूपदेशज्ञानेन सहजसिद्धमज
पाजपं समर्पयेत् यथा ॐ अद्य पूर्वेद्युरहोरात्राचरितसुच्छ्वा
सनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकं
अजपाजपं मूलाधारस्वाधिष्ठानमणिपूरनाहतविशुद्ध्याज्ञा
ब्रह्मरंध्रेषु चतुर्दलषट्दलदशदलद्वादशदलषोडशदलद्वि
दलसहस्रदलेषु स्वर्णविद्रुमनीलपिंगलधूम्रवर्णविद्युत्कर्पू
रवर्णेषु स्थिताभ्यो गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मा
श्रीगुरुपादुकाभ्यो यथाभागशः समर्पयामि इति कृतांज
लिसंकल्पं समर्पयेत् ॐ ऐं ह्रीं श्रीं मूलाधारचक्रस्थाय गणप
तये जपाजपानां षट्शतानि समर्पयामि नमः ॐ ऐं ह्रीं श्रीं
स्वाधिष्ठानचक्रस्थाय ब्रह्मणे जपाजपानां षट्सहस्राणि सम

मु. र्पयामिनमः ॐ ऐं ह्रीं श्रीं मणिपूरचक्रस्थाय विष्णवे अजपाज
प. पानां षट्सहस्राणि समर्पयामिनमः ॐ ऐं ह्रीं श्रीं अनाहतचक्र
४ स्थाय रुद्राय अजपाजपानां षट्सहस्राणि समर्पयामिनमः
ॐ ऐं ह्रीं श्रीं विशुद्धचक्रस्थाय जीवात्मने अजपाजपानां सहस्रं
समर्पयामिनमः ॐ ऐं ह्रीं श्रीं आज्ञाचक्रस्थाय परमात्मनेऽज
पाजपानां सहस्रं समर्पयामिनमः ॐ ऐं ह्रीं श्रीं सहस्रदलक
मलकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै अजपाजपानां
सहस्रं समर्पयामिनमः इत्यजपाजपं समर्प्य ॐ अद्य सूर्योदय
मारभ्य आगामिसूर्योदयं यावत् अहोरात्रेणोच्छ्वासनिःश्वासा
त्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकं अजपाजप।
महं करिष्ये इतिकृतांजलिः संकल्प्य अजपामंत्रेण प्राणाया
मं विधाय ॐ अस्य श्री अजपागायत्रीमंत्रस्य हंसऋषिः अव्य।
क्तगायत्री छंदः परमात्मादेवता हंबीजं सः शक्तिः सोहं कील
कं मम शक्तिसाधने जपे विनियोगः शिरसि ॐ ऐं ह्रीं श्रीं हं।
सात्मने ऋषये नमः मुखे ॐ ऐं ह्रीं श्रीं अव्यक्तगायत्रीछंदसे नमः
हृदये ॐ ऐं ह्रीं श्रीं परमात्मदेवतायै नमः मूलाधारे ॐ ऐं ह्रीं श्रीं
हंबीजाय नमः पादयोः ॐ ऐं ह्रीं श्रीं सः शक्तये नमः नाभौ ॐ ऐं
ह्रीं श्रीं सोहं कीलकाय नमः हृदि ॐ ऐं ह्रीं श्रीं ॐकारतत्वाय न
मः कंठे ॐ ऐं ह्रीं श्रीं उदात्तायस्वराय नमः मूर्ध्नि ॐ ऐं ह्रीं श्रीं न
भसेस्थानाय नमः हेमवर्णाय नमः सर्वांगे मम मोक्षार्थे जपे।
विनियोगः इतिकृतांजलिर्विदेत् ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने ह्रा
हां अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं श्रीं ह्रीं सोमात्मने स्वाहा तर्जनी।

भ्यां स्वाहा ॐ ऐं ह्रीं श्रीं ह्स्रूं निरंजनात्मने स्वाहा मध्यमाभ्यां वषट्
ॐ ऐं ह्रीं श्रीं ह्स्रैं निराभासात्मने स्वाहा अनामिकाभ्यां हुं ॐ ऐं ह्रीं श्रीं
ह्स्रौंः अनंततनुः सूक्ष्मा देवी प्रचोदयात् स्वाहा कनिष्ठिकाभ्यां वौषट्
ॐ ऐं ह्रीं श्रीं ह्स्रः अव्यक्तबोधात्मने स्वाहा करतलकरपृष्ठाभ्यां फट्
इति करन्यासः ॐ ऐं ह्रीं श्रीं ह्स्रां सूर्यात्मने स्वाहा हृदयाय नमः ॐ ऐं
ह्रीं श्रीं सोमात्मने स्वाहा शिरसे स्वाहा ॐ ऐं ह्रीं श्रीं ह्स्रूं निरंजनात्म
ने स्वाहा शिखायै वषट् ॐ ऐं ह्रीं श्रीं ह्स्रैं निराभासात्मने स्वाहा कवचा
य हुं ॐ ऐं ह्रीं श्रीं ह्स्रौंः अनंततनुः सूक्ष्मा देवी प्रचोदयात् स्वाहा नेत्रत्र
याय वौषट् ॐ ऐं ह्रीं श्रीं ह्स्रः अव्यक्तबोधात्मने स्वाहा अस्त्राय फट्
इति षडंगन्यासः ध्यानं कुर्यात् ॐ द्यां मूर्धानं यस्य विप्रा वदंति खं वै
नाभिं चंद्रसूर्यौ च नेत्रे दिग्भिः श्रोत्रं यस्य पादौ क्षितिश्च ध्यातव्यो
सो सर्वभूतांतरात्मा इति विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनु संथा
यी प्राणवायोर्निर्गमप्रवेशात्मकं अजपामंत्रं पंचविंशतिवारं जप्त्वा
समर्प्य श्रीगुरूपदिष्टमार्गेण नादानुसंधानं एवं कं निरस्तसमस्तो
पाधिना केनापि चिद्विलासेन प्रवर्त्तमानोस्मीति विभाव्य स्वका
र्यानुष्ठाय ॐ समुद्रमेखले देवि पर्वतस्तनमंडले विष्णुपत्नि नम
स्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य श्वासानुसारेण तस्यां।
पादं निधाय नेदं तु साधकः सर्वे विनश्यंतु विदूषकाः अवस्याशा
म्भवीमेस्तु प्रसन्नोस्तु गुरुः सदा इति वदन् बहिर्गत्वा मलमूत्रोत्स
र्गशौचाचमनं विधाय क्लीं कामदेवाय सर्वजनप्रियाय नमः इति
दंतधावनं कुर्यात् ततो नद्यादौ गत्वा वैदिकस्नानं निवर्त्य तांत्रिक
मारभेयथा तत्रादौ मूलेन करचरणमुखानि प्रक्षाल्य ॐ मलिनाय

भु. रिवह्निशिखिनि महाशक्तिसे रेरत्तरत्त हूं फट् स्वाहा इति शिखां बद्ध्वा
प. ऽचमनत्रयं कुर्यात् मूलं आत्मतत्त्वं शोधयामि स्वाहा मूलं विद्या
५ तत्त्वं शोधयामि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा इत्याचम्य
मलापकर्षणस्नानं विधाय पुनराचम्य ॐ अद्यामुकमासस्ये।
त्यादि श्रीभुवनेश्वरीप्रीत्यर्थं तांत्रिकस्नानमहं करिष्ये इति सं
कल्प्य प्राणायामं कृत्वा स्वमूलऋष्यादिकरषडंगन्यासांश्च विधा
य नाभिमात्रजले स्थित्वा स्वपुरतो हस्तमात्रं चतुरस्रं तीर्थं प
रिकल्प्य ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्ये
न देवेशि तीर्थं देहि दिवाकर इति सूर्यात्तीर्थं प्रार्थ्य क्रौं अंकु
शमुद्रया मूलमंडलं भित्त्वा ॐ गंगे च यमुने चैव गोदावरि सरस्व
ति नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु इति सूर्यमंडलात्ती
र्थमावाह्य पुरःकल्पिततीर्थे संयोज्य पुनः सूर्यमंडलादेव
ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमये तीर्थशक्ते एह्येहि स्वाहा इति
तीर्थमावाह्य तस्मिंस्तीर्थमंडले तां ध्यायेद्यथा सर्वानंदमये
मध्येषडरितधेसांमृगांकप्रभां ध्यन्तां चोर्ध्वकरद्वयेन दधतीं पा।
शसृणिं च क्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं पुस्ताक्षमालां
वरां गंगासिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं भजे इति ध्यात्वा
ॐ नमो भगवति अंबे अंबालिके अंबिके महामालिनि एह्येहि भग
वति अशेषतीर्थालवाले ह्रीं शिवजटाधिरूढे गंगे गंगांबिके
स्वाहा इति मंत्रेण सप्तधाभिमंत्र्य ह्रीं इत्यालोड्य वमित्यमृतेश
मुद्रयामृतीकृत्य ॐ आत्मतत्त्वात्मने नमः ॐ विद्यातत्त्वात्मने न
मः ॐ शिवतत्त्वात्मने नमः इति तत्त्वत्रयं जले विन्यस्य तत्र श्री।

चक्रंविभाव्य तत्रहृदयकमलाद्देवीमावाह्य षडङ्गेनसक
लीकृत्य तांसावरणांस्नपयित्वा योनिमुद्रयामूलेनतज्जल
मष्टधाभिमंत्र्य तत्रमूलमंत्रस्मरणपूर्वकंत्रिर्निमज्ज्योन्मज्जेत्
ततःकुंभमुद्रयामूलमंत्रंपठन्स्वशिरसित्रिरभिषिच्य मूले
नदेवींत्रिःसंतर्प्य पुनर्देवींस्वहृदिसमानीय मूलमात्मतत्त्वं
शोधयामिस्वाहा मूलंविद्यातत्त्वंशोधयामिस्वाहा मूलंशिव
तत्त्वंशोधयामिस्वाहा इतित्रिराचम्य तीरमारुह्य धौतवाससी
परिधाय त्रिपुण्ड्रकमूर्ध्वपुण्ड्रकंवातिलकंविधाय वैदिकसंध्यां
समाप्य तांत्रिकसंध्यामारभेत इतिस्नानविधिः अथसंध्या
तत्रपूर्ववदाचम्य मूलेनत्रिखंडांबद्ध्वा प्राणायाममृष्यादि
करषडङ्गन्यासान्विधाय स्वपुरतोधेनुमुद्रया तथैवरचि
तंतीर्थजलममृतीकृत्य मूलेनाष्टधाभिमंत्र्य तेनजलेन
अंनमः इत्यादि क्षंनमः इत्यंतमातृकाक्षरैःस्वशिरःप्रोक्ष्य मू
लेनचत्रिःसंप्रोक्ष्य दक्षहस्तेजलमादायवामेनाच्छाद्य लं
वंरंयंहं इतिपांचभौतिकमंत्रैःसप्तवारमभिमंत्र्य मूलेन
चत्रिःअभिमंत्र्य तज्जलबिंदुभिर्वामहस्तकृततत्त्वमुद्रयामू
लेनस्वशिरस्त्रिःप्रोक्ष्य अवशिष्टंजलंवामहस्तेनिधाय
तेजोरूपंतज्जलंइडयाकृष्य स्वदेहांतःस्थितंसकलकलुषं
प्रक्षाल्य तज्जलंकृष्णवर्णंपिंगलयावहिर्निर्गतंमत्वा पुन
र्दक्षहस्तेकृत्वा वामभागेज्वलद्वज्रशिलांध्यात्वा ऐंक्लींपशु
हुंफट् इतिपाशुपतास्त्रमंत्रेणतस्यांशिलायांआस्फाल्य मूले
नजलमादाय प्रवक्त्राआसहस्रदलपरमात्मनेनैकीभूतंविभा

भु. व्य निर्गमय्यतेनजलेन ॐअमृतमालिन्यैस्वाहा इतिकुक्षौःस्व
प. शिरस्त्रिःप्रोक्ष्य ॐआत्मतत्वंशोधयामिस्वाहा ॐविद्यातत्वं।
६ शोधयामिस्वाहा ॐशिवतत्वंशोधयामिस्वाहा ॐशिवतत्वं
शोधयामिस्वाहा ॐविद्यातत्वंशोधयामिस्वाहा ॐआत्मत
त्वंशोधयामिस्वाहा ॐसर्वतत्वंशोधयामिस्वाहा इतित्रिराच
6 म्य इतिजलेननवधाचम्य जलमंजलिनादायोत्थाय ॐह्रां
ह्रीं हंसः श्रीमार्तण्डभैरवायप्रकाशशक्तिसहिताय इदमर्घ्यं
परिकल्पयामिस्वाहा इतित्रिरर्घ्यंकुलसूर्यायदत्वा स्वात्मना।
त्सूर्यमंडलेमूलदेवींनीत्वा तत्रविधिवद्ध्यात्वा ऐंपनदायैवि
महे श्रीरतिप्रियायैधीमहि श्रींस्वाहाप्रचोदयात् इतिगायत्री
ऐंहृल्लेखायैविद्महे ह्रींभुवनायैधीमहि श्रींतन्नः शक्तिःप्र
चोदयात् अथामूलगायत्र्याचतस्त्रःसंध्यास्वदेव्यै अर्घ्यंसू
र्यविंवेदत्वा ततः चतस्त्रसंध्यासुक्रमशोमूलाधारहृद
न्ताब्रह्मरंध्रेभ्योदेवीतेजःसमाकृष्य कल्पितवह्निसूर्यचंद्र।
तारामंडलेषुनिक्षिप्य तत्रबालयौवनप्रौढचिद्रूपांश्रीदेवीं।
ध्यात्वा ऐंहृल्लेखायैविद्महे भुवनायैधीमहि तन्नःशक्तिःप्रचो
दयात् इतिप्रातः ह्रींहृल्लेखायैविद्महे भुवनायैधीमहि त
न्नःशक्तिःप्रचोदयात् इतिमध्याह्ने श्रींहृल्लेखायैविद्महे भुव
नायैधीमहि तन्नःशक्तिःप्रचोदयात् इतिसायं ऐंहृल्लेखायै
विद्महे ह्रींभुवनेश्वर्यैधीमहि श्रींतन्नःशक्तिःप्रचोदयात् इत
र्धरात्रे इतिस्वस्वगायत्र्यार्घ्यंदत्वा यथाशक्तिजप्त्वा प्राणायाम
ऋष्यादिकरषडंगध्यानानिविधाय यथाशक्तिमूलंसंजप्य

स्वस्वगायत्रीमपिजप्त्वा मूलगायत्रीं संजप्य पुनरपिप्रा
णायामऋष्यादिकरषडंगादिनाजपंसमर्प्य मंडलेभ्योदे
वीतेजः स्वस्वस्थानेदेवीं चहृदिसमानीयध्यायेत् इतिसंध्या
विधिः अथतर्पणं तत्रपूर्ववदाचम्य प्राणायामऋष्यादि
करषडंगन्यासादिकृत्वा तीर्थंपूर्ववदावाह्य मूलेनजलंस
मथामृतमुद्रयामृतीकृत्य तत्रजलेयंत्रंध्यात्वा तत्रदेवींहृ
दयात्सपरिवारामानीय षडंगयोगेनसकलीकृत्य कुंडलि
न्याप्रयोगेनामृतेनाभिषिंच्यविधिवत्प्रपूज्य ऐशान्यां ओं ऐं
ह्रीं श्रीं श्रीमच्छ्रीगुरुप्रथमकभैरवस्तृप्यतां वह्नौ ओं ऐं ह्रीं श्रीं प
रमगुरुभैरवस्तृप्यतां नैर्ऋत्यां ओं ऐं ह्रीं श्रीं परमाचार्यगुरुभै
रवस्तृप्यतां वायव्ये ओं ऐं ह्रीं श्रीं परमेष्ठिगुरुभैरवस्तृप्यतां
इतित्रिः सकृद्वा संतर्प्य ओं ऐं ह्रीं श्रीं भुवनेश्वरीभगवतीस्वेश्व
रास्ववाहनासपरिवारातृप्यतां इतित्रिः संतर्प्य परिवारदे
वतासंतर्पयेयथा ह्रां हृदयंतृप्यतां ह्रीं शिरःतृप्यतां ह्रूं शि
खातृप्यतां ह्रैं कवचंतृप्यतां ह्रौं नेत्रत्रयंतृप्यतां ह्रः अस्त्रंतृप्य
तां ह्रीं हृल्लेखातृप्यतां ऐं गगनातृप्यतां उं रक्तातृप्यतां ईं करा
लिकातृप्यतां ओं महोच्छुष्मातृप्यतां गं गंगातृप्यतां यं यमु
नातृप्यतां सं सरस्वतीतृप्यतां गायत्रीसहितब्रह्मातृप्यतां
सावित्रीसहितविष्णुःतृप्यतां सरस्वतीसहितरुद्रःतृप्यतां
लक्ष्मीसहितकुबेरःतृप्यतां रतिसहितमदनःतृप्यतां पुष्टि
सहितविघ्नराजःतृप्यतां शंखनिधिःतृप्यतां पद्मनिधिःतृ
प्यतां अनंगकुसुमातृप्यतां अनंगकुसुमातुरातृप्यतां अ

स्तु. नंगमदनात्तृप्यतां अनंगमदनातुरात्तृप्यतां अनंगमेख
प. लात्तृप्यतां भुवनपालात्तृप्यतां गगनवेगात्तृप्यतां शशिरे
खात्तृप्यतां करालीन्तृप्यतां विकरालीन्तृप्यतां उमात्तृप्यतां
सरस्वतीन्तृप्यतां श्रीःतृप्यतां दुर्गात्तृप्यतां उषात्तृप्यतां ल
क्ष्मीःतृप्यतां सत्यात्तृप्यतां श्रुतिःतृप्यतां स्मृतिःतृप्यतां धृ
तिःतृप्यतां श्रद्धात्तृप्यतां मेधात्तृप्यतां मतिःतृप्यतां अनंग
रूपास्तृप्यतां अनंगमदनात्तृप्यतां भुवनवेगात्तृप्यतां भु
वनपालिकात्तृप्यतां सर्वशिशिरात्तृप्यतां अनंगवेदनात्तृप्य
तां इंद्रःतृप्यतां अग्निःतृप्यतां यमःतृप्यतां नैरृतिःतृप्यतां
वरुणःतृप्यतां वायुःतृप्यतां कुवेरःतृप्यतां ईशानःतृप्यतां ब्र
ह्मात्तृप्यतां अनंतःतृप्यतां वज्रःतृप्यतां शक्तिःतृप्यतां दंडः
तृप्यतां खड्गःतृप्यतां पाशःतृप्यतां ध्वजःतृप्यतां गदात्तृ
प्यतां त्रिशूलंतृप्यतां पद्मंतृप्यतां चक्रंतृप्यतां इतिपरिवा
रदेवतासंतर्प्य पुनःप्राणायामादिविधाय देवींस्वहृदिवि
सृज्य तीर्थंस्वस्थानेविसृजेत् इतितर्पणं ततः ॐवज्रोदकि
हुंफट्स्वाहा इत्यनेनजलकुंभंगृहीत्वा मूलंस्मरन्यागगेहमा
गत्य ॐह्रींविशुद्धसर्वपापानिशमयाशेषविकल्पमपनयहुं
इत्यनेनहस्तौपादौप्रक्षाल्य एवंवदाचम्य द्वाराग्रेस्थित्वा नी
लतरंगमथितहस्तशोभमानानीलांशुकाभरणमाल्यवि
भूषणाख्या निद्रापटेनभुवनानितिरेदधानाखड्गधराभग
वतीपरिपातुहस्तामां स्वदक्षेवस्माणक्रमेणसामान्यार्घ्यंकृत्वा
तेनजलेनद्वारदेवतांसंपूजयेत् यथा द्वारोर्ध्वे गंगणपतयेनमः

दक्षे वं वटुकाय नमः वामे क्षं क्षेत्रपालाय नमः अधः यां
योगिनीभ्यो नमः दक्षे गं गंगायै नमः वामे यं यमुनायै नमः
दक्षे श्रीं श्रियै नमः वामे सं सरस्वत्यै नमः इति संपूज्य वामांग
संकोचेन मंडपांतर्गत्वा तत्र नैर्ऋत्ये ब्रह्मणे नमः वास्तुपुरुषा
य नमः इति संपूज्य भूमौ चतुष्कोणमंडलं विधाय तत्रासनमा
स्तीर्य चतुष्कोणे ह्रीं आधारशक्तिकमलासनाय नमः इति
संपूज्य तदुपरि कुशविष्टरं दत्वा कृतांजलिः पठेत् यथा ॐ
अस्य श्री आसनशोधनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कू
र्मो देवता आसनारोपणे विनियोगः इति स्मृत्वा न्यासं कुर्यात् ॐ
मेरुपृष्ठऋषये नमः शिरसि सुतलछंदसे नमः मुखे कूर्मदेव
तायै नमः हृदि आसनारोपणे विनियोगः सर्वांगेषु इति विन्य
स्यासनं पूजयेत् यथा मंडूकाय नमः कालाग्निरुद्राय नमः आ
धारशक्त्यै नमः मूलप्रकृत्यै नमः कूर्माय नमः अनंताय नमः
पृथिव्यै नमः सुधासमुद्राय नमः मणिद्वीपाय नमः चिंतामणिगृ
हाय नमः पारिजाताय नमः रत्नवेदिकायै नमः इति गंधादिना
कुशविष्टरं संपूज्य अः फट् इति पूजां वेदीं गत्वा तदुपरि वीरासा
सनेनोपविश्य ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं
च धारय मां देवि पवित्रं कुरु चासनं इति पठित्वा ॐ ऐं ह्रीं श्रीं क्लीं।
पृथिव्यै नमः इति पृथिवीं संपूज्य संविदं यथा मंत्रं स्वीकुर्यात्
तद्विधिर्यथा ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ब्राह्मणा
नां च तृप्त्यर्थं पवित्रा भव सर्वदा ॐ ब्रह्मण्यै नमः स्वाहा ॐ सिद्धमू
लक्षये देवि हीनबोधप्रबोधिनि राजप्रजावशंकरि शत्रुपक्षनि

भु.
प.
८

8

स्वादिनि ऐं तत्त्वत्रयायै नमः स्वाहा अज्ञानेंधनदीप्ताग्ने ज्ञानाग्नि
ब्रह्मरूपिणि आनंदस्वाहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ह्रीं वेद्या
यै नमः स्वाहा नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्य
विजये मातः समाधिफलदा भव ह्रीं शुद्धायै नमः स्वाहा इति सं।
शोध्य ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय २ सिद्धिं
देहि २ श्रीभुवनेश्वरीपदं वशमानय २ स्वाहा इति तदुपरि मूलमं
त्रं च सप्तधा प्रजप्य ततो मूलं आगच्छ २ मूलं संतिष्ठ २ मूलं सन्निधे
हि २ मूलं सन्निरुध्यस्व २ मूलं संमुखी भव २ इति मुद्राः प्रदर्श्य छो
टिकाभिर्दशदिग्बंधनं विधाय तालत्रयपुरःसरं दिव्यदृष्ट्या वाम
पार्ष्णिघातत्रयेण विघ्नान्निवार्य सहस्रारपद्मे तत्त्वमुद्रया श्रीगुरु
पादुकां त्रिधा संतर्प्य स्वस्वादिसप्तधा देवीं संतर्प्य ऐं वद वद वाग्वा
दिनि मम जिह्वाग्रे स्थिरी भव सर्वतत्त्ववशंकरि स्वाहा इत्यनेन मु
खे संविदं तत्त्वमुद्रया जुहुयात् इति संविच्छुद्धिः ततः आनंदमयो
भूत्वा श्रीचक्रं स्वर्णासने पुरतः संस्थाप्य मूलेन पुष्पांजलिना मि।
श्राय वामकर्णोर्ध्वे श्रीगुरुपादुकाभ्यो नमः दक्षकर्णोर्ध्वे गं गणप
तये नमः मध्ये श्रीभुवनेश्वर्यै नमः इति नत्वा स्वदक्षे गंधपुष्पादिकं
निधाय वामे स्वगंधजलकुंभं निधाय देवतायाः पश्चिमे कलद
व्याणि निधाय पुष्पादिकं प्रोक्षयेद्यथा ॐ शताभिषेके हुं फट्।
स्वाहा ॐ पुष्पकेतुराजाय शताय सम्यक्संयोगवहाय हुं ॐ पुष्पे
पुष्पमहापुष्पे सुपुष्पे पुष्पसंभवे पुष्पप्रचयावकीर्णे हुं फट् स्वा
हा इति पुष्पाभिमंत्रणं ह्रां हूं फट् इति स्मरनाराचमुद्रया दिव्य।
दृष्ट्या च पुष्पादिकं च पुनर्विलोक्य वामभागस्थजलपूर्णकुंभं आ

मितिवामहस्तेन स्पृष्ट्वा ह्सौमिति दक्षकराग्रेण तत्स्थं जलं च
स्पृष्ट्वा रमिति दीपशिखां च स्पृष्ट्वा गंधादिकं मूलेनाभिमंत्र्य
करौ प्रक्षाल्य मूर्ध्नि संयद्दृग्मुद्रां विधाय ह्सौंः सहक्षमलवयरां
सहक्षमलवयरूं सहक्षमलवयरीं ह्सौंः श्रीपरापावकसर्वारा।
ध्यसर्वमूर्धपुरनाथसर्वगुरुस्वयंगुरुश्रीगुरुनाथ रहसहक्षम
लवयरूं ह्सौंः सहक्षमलवयरीं सहक्षमलवयरूं सहक्षमलवय
रां श्रीगुरुह्सौंः सहक्षमलवयरूं श्रीपादुकां पूजयामि नमः इति
शिरसि श्रीपादुकां विन्यस्य पुनरनयैव विधया गंधादिना संपूज्य
गंधादिमुद्राः प्रदर्श्य ॐ नमोस्तु गुरवे तस्मायिष्टदेवस्वरूपिणे यस्य
वागमृतं हंति विषं संसारसंज्ञकं इति नमस्कारमुद्रया प्रणम्य ॐ ऐं
ह्रीं श्रीं स्रें स्रां सौंः इति करशुद्धिं विधाय करावन्योन्यमर्दनेन संशोध्य
मध्यमयोः ॐ ऐं ह्रीं श्रीं स्रें नमः अनामयोः ॐ ऐं ह्रीं श्रीं स्रां नमः कनि।
ष्ठयोः ॐ ऐं ह्रीं श्रीं सौंः नमः अंगुष्ठयोः ॐ ऐं ह्रीं श्रीं स्रां नमः तर्जन्योः ॐ
ऐं ह्रीं श्रीं स्रां नमः करतलकरपृष्ठयोः ॐ ऐं ह्रीं श्रीं सौंः नमः इति विन्यस्य
मूले नमो भुवनेश्वरि मां रक्ष २ इति मूर्धादिपादपर्यंतं त्रिर्व्यापकं वि
न्यस्य अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारः ते
नश्यंतु शिवाज्ञया पाषंडकारिणो भूता भूतावस्थांतरिक्षगाः दिवि
लोके स्थिता ये च ते नश्यंतु शिवाज्ञया इति वामपार्ष्णिघातत्रयेण त।
र्जनीमध्यमाभ्यां मूर्ध्वोर्ध्वतालत्रयदानेन दिव्यदृष्ट्या च त्रिविधविघ्ना।
नुत्सार्य छोटिकाभिर्दशदिग्बंधनं विधाय चतुर्दिक्षु वह्निप्राकारं सं
चिंत्य प्राणायामत्रयं कुर्यात् तदुक्तं इडयापिव षोडशभिः पवनं कुरु
षट्चतुष्टयमेतरगे यजपिंगलया शनकैः शनकैर्दशभिर्दशभिर्द
शभिर्द्वियिकैः इत्थं करीत्या प्राणं वषोडशवारमुच्चरन्दत्तागुहेनद

सु. दक्षनासापुटं निरुध्य वामेन पवनं पूरयेत् ततस्तमेव चतुःषष्टिवा
प. रमुच्चरन् दक्षनासां कनिष्ठाभ्यां वामपुटं च निरुध्य द्वाभ्यां पवनं कुर्या
९ त् ततस्तमेव द्वात्रिंशद्वारमुच्चरन् वामपुटं तथैव निरुध्य दक्षेण प
वनं रेचयेत् इत्येकः प्राणायामः एवमेव विपर्ययेण कृतो द्वितीयः
9 प्रथमवत्तृतीयः इत्थं प्राणायामत्रयेण निरस्तसकलकल्मषदेव
ताराधनयोग्यं स्वदेहं विभाव्य भूतशुद्धिं कुर्यात् यथा पादादिजानुप
र्यन्तं पृथ्वीस्थाने चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवतं निवृत्ति।
कलाधिष्ठितं लंबीजयुतं ध्यात्वा जान्वादिनाभिपर्यन्तमपांस्थाने शु
क्लवर्णं अर्धचंद्राकारं शृंगद्वयेपि पद्मलांछितं विष्णुदैवतं प्रतिष्ठाक
लाधिष्ठितं वंबीजयुतं ध्यात्वा नाभ्यादिकंठपर्यन्तं वह्निमंडलं स्वस्ति
कोपेतं त्रिकोणाकारं रक्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं रंबी
जयुतं ध्यात्वा कंठादिभ्रूमध्यपर्यन्तं वायुमंडलं षट्कोणाकारं
षड्बिंदुलांछितं धूम्रोपीतं कृष्णवर्णमीश्वरदैवतं शांतिकलाधि
ष्ठितं यंबीजयुतं ध्यात्वा भ्रूमध्यादिब्रह्मरंध्रान्तं आकाशस्थाने वृत्ता
कारं ध्वजलांछितं स्वच्छवर्णं सदाशिवदैवतं शांत्यतीताकलाधि
ष्ठितं हंबीजयुतं ध्यात्वा तत्र पंचभूतमये देहे धर्मकर्मसमुद्भूतं ज्ञा
ननालकमैश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं स्वहृदयारविंदं ध्या
त्वा तत्कर्णिकायां जीवात्मानमारग्रमात्रं प्रदीपकलिकाभास्वर
मनादिसत्तासंछन्नपरचिद्रूपं संचिंत्य प्राणरूपेण मूलाधारा।
त्कुंडलिनीमुत्थाय सुषुम्णावर्त्मना मूलाधाराद्यनाहतांतस्य व
र्णवर्णादिदेवताग्रसंतीं हृदयकमलमानीय तया कवलीकृतं
जीवात्मानं ध्यायन् सुषुम्णावर्त्मना विशुद्ध्यादिचक्रस्य वर्णा
दिदेवताग्रसंतीं ब्रह्मरंध्रं नीत्वा तत्रस्थितसहस्रदलकमले।

कर्णिकामध्यवर्त्तिनि परमात्मज्योतिषि स्ववर्णावर्णदेवता
कदंबकं जीवात्मानं हंस इति मंत्रेण संयोज्य कुंडलिनीस्स्वस्था
नमानीय तत्त्वसंहारं कुर्यात् तत्र पृथिवीस्थाने पादेंद्रियगमन
क्रियागंतव्यं गंधघ्राणपृथिवीब्रह्मनिवृत्तिसमानवायून्संस्मृत्य
ॐ ह्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने हुं फट् स्वाहा इ
ति मंत्रेण तान् कुंडलिनीद्वारा अपां मध्ये संहरेत् ततः अपां स्था
ने हस्तदानदातव्यरसरसनाजलविष्णुप्रतिष्ठोदानान्संचिंत्य
ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा इ
ति तान्सर्वान् कुंडलिनीद्वारा वह्नितत्त्वे संहरेत् ततो वह्निस्थाने
पायुविसर्गविसर्जनीयरूपचक्षुर्वह्निरुद्रविद्याव्यानान्संस्मृत्य
ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने हुं फट् स्वाहा इति मं
त्रेण तान्सर्वान् वायुमंडले संहरेत् ततो वायुस्थाने तपस्थानंद
तद्विषयस्पृष्टव्यवायवीश्वरशांत्यापनान्संस्मृत्य ॐ ह्रैं ईश्वरा
य वाय्वधिपतये शांतिकलात्मने हुं फट् स्वाहा इति तान्सर्वा
नाकाशस्थाने संहरेत् तत आकाशस्थाने वाग्वचनवक्तव्य
शब्दश्रोत्राकाशसदाशिवशांत्यतीतप्राणान्संस्मृत्य ॐ ह्रीं
सदाशिवाकाशाधिपतये शांत्यतीताकलात्मने हुं फट् स्वा
हा इति तान्सर्वान् कुंडलिन्या संहृत्य ततो बिंदुशक्तौ बिंदुश
क्तिं नादशक्तौ नादशक्तिं परमशक्तौ प्रणवेन संहृत्य ॐ ह्रीं
हुं फट् स्वाहा इति तां परमशक्तिं पूर्वोक्तपरमात्मनि संयोज्य
केवलशरीरे वामकुक्षौ पापपुरुषं विचिंतयेत् तद्यथा वा
मकुक्षिस्थितपापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कं चस्व

भु. णिस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं
प. तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणं
१. रक्तश्मश्रुविलोचनं खड्गचर्मधरं क्रुद्धं पापं कुक्षौ विचिंत
येत् इति पापपुरुषं विचिंत्य वामनासारंध्रे यंवीजेन स
10 हवायुमापूर्य नाभिस्थषट्कोणाकारे वायुमंडले संयोज्य
तत्र यमिति वायुवीजं धूम्रवर्णं संचिंत्य कुंभकेन यमिति वा
युवीजमावर्त्तयंस्तदुत्थितेन महावायुना स्वपापपुरुषं स्व।
शरीरस्थं संशोष्य वायुं दक्षिणनासया विरेच्य पुनर्दक्षि
णनासया रंवीजेन सह वायुमापूर्य मूलाधारे संयोज्य रमिति
वह्निवीजं रक्तवर्णं विचिंत्य कुंभकेन रमिति वीजमावर्त्तयं
स्तदुत्थितमहावह्निना स्वपापपुरुषं स्वदेहस्थं संदह्य पा
पपुरुषभस्मना सहितं वायुं वामनासया विरेच्य पुनः वाम
नासया वंवीजेन सह वायुमापूर्य ब्रह्मरंध्रे संयोज्य तत्रस्थि
तचिच्चंद्रमंडले वमित्यमृतवीजं शुक्लवर्णं विचिंत्य कुंभके
न वंवीजमावर्त्तयंस्तत्रस्थितामृतधारया स्वदेहं भस्मप्लुतं
विभाव्य तं वायुं दक्षिणनासया विरेच्य पुनर्दक्षिणनासया
लंवीजेन वायुमापूर्य मूलाधारस्थपार्थिवमंडले संयोज्य
तत्र लमिति पृथ्वीवीजं पीतवर्णं संचिंत्य कुंभकेन लंवीज
मावर्त्तयंस्तदुद्भूतेन तेजसाऽमृतप्लावितभस्म घनीकृत्य
तं वायुं वामनासया विरेच्य पुनर्वामनासया मायावीजेन वा
युमापूर्य मूलाधारस्थविंदुमध्ये मायावीजं स्फुरद्बालार्कव।
र्णं संचिंत्य कुंभकेन मायावीजमावर्त्तयंस्तेन करचरणाद्यव

यवसमेतं स्वदेहं विष्णुं विभाव्य तं वायुदक्षिणनासया
विरेचयेत् इति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं निष्पाद
येत् तद्यथा तत्र पूर्वोक्तसहस्रारकमलस्थपरमात्मनः स
काशात्सकलजगत्सिसृक्षाविजृंभितपरंब्रह्मेच्छारूपिणीं
परशक्तिं ॐ ह्रीं नमः इति परमात्मनः सकाशात्स्वस्थानमानी
य ततो नादशक्तिं बिंदुशक्तिं सृष्ट्वा बिंदुशक्तेः सकाशात्सक
लजगत्सृष्टिहेतुभूतां कुंडलिनीं प्रणवेन निःसार्य ततः ॐ ह्सौं
सदाशिवायाकाशाधिपतये शांत्यतीताकलात्मने नमः इति
प्राणं शांत्यतीतां सदाशिवाकाशश्रोत्रशब्दवक्तव्यवचनवाच
आकाशस्थाने स्थापयेत् ततः आकाशमंडलात् ॐ ह्सैं ईश्वरायवा
य्वधिपतये शांतिकलात्मने नमः इति मंत्रेणापानं शांतीश्वर
वायुस्प्रष्टव्यस्पर्शनद्विषयानंदोपस्थान्वायुस्थाने स्थापयेत्
ततः ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने नमः इति मं
त्रेण व्यानं विद्यां रुद्रं तेजश्चक्षूरूपविसर्जनीयविसर्गपायूनग्नि
स्थाने स्थापयेत् ततः ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकला
त्मने नमः इति मंत्रेणोदानं प्रतिष्ठां विष्णुजलरसनारसदात
व्यदानहस्तानपांस्थाने स्थापयेत् ततः ॐ ह्रों ब्रह्मणे पृथिव्य
धिपतये निवृत्तिकलात्मने नमः इति मंत्रेण समानं निवृत्तिं ब्र
ह्म पृथ्वीघ्राणगंधगंतव्यगमनक्रियापादेंद्रियाणि पृथ्वीस्थाने
स्थापयेत् नादशक्तिबिंदुशक्तिपरमशक्तीनां प्रणवेन स्वदेहे व्या
प्तिं विभाव्य सोहमिति मंत्रेण ब्रह्मरंध्रस्थपरमात्मनः सकाशात्
कुंडलिनीं जीवात्मानं च संहृतवर्णां वर्णाधिदेवतासहितमास्था

ततः प्रणवेण कुंडलिनीं स्वस्थाने स्थापयेत् २

भु. दिचक्रेषु तत्तद्वर्णाधिदेवताः स्थापयेत् हृदयकम
प. लमानीय हृदयकमले जीवात्मानं स्थापयित्वा ॐ कुण्डलिनी
११ सुषुम्णामार्गेण मणिपूरकादिचक्रेषु तत्तद्वर्णाधि
देवताः स्थापयेत् मूलाधारं नीत्वा तत्र स्थापयेत् इति भूतशु
द्धिः ततः स्वशरीरं निरस्तसकलकल्मषं तेजोरूपं देवताराध
नयोग्यं विभाव्य प्राणप्रतिष्ठां कुर्यात् यथा ॐ अस्य श्रीप्राण
प्रतिष्ठामन्त्रस्य ब्रह्मविष्णुशिवा ऋषयः ऋग्यजुःसामानि छं
दांसि पराप्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं
मम श्रीभुवनेश्वर्यंगत्वेन प्राणप्रतिष्ठार्थे विनियोगः इति।
कृतांजलिः न्यसेत् ॐ ब्रह्मविष्णुशिवेभ्य ऋषिभ्यो न।
मः शिरसि ऋग्यजुःसामभ्यः छंदोभ्यो नमः मुखे पराप्राण
शक्तिर्देवतायै नमः हृदि ह्रीं शक्तये नमः पादयोः क्रों की
लकाय नमः नाभौ मम श्रीभुवनेश्वर्यंगत्वेन प्राणप्रतिष्ठा
र्थे विनियोगः सर्वांगेषु इति ऋष्यादिन्यासः अथ करन्यासः
ॐ आं ह्रीं क्रों अं कं खं गं घं ङं आकाशवाय्वग्निसलिलपृथिव्या
त्मने आं अंगुष्ठाभ्यां नमः ॐ आं ह्रीं क्रों इं चं छं जं झं ञं शब्दस्पर्शरू
परसगंधात्मने ईं तर्जनीभ्यां स्वाहा ॐ आं ह्रीं क्रों उं टं ठं डं ढं णं श्रो
त्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां वषट् ॐ आं ह्रीं क्रों
एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां हुं
ॐ आं ह्रीं क्रों ओं पं फं बं भं मं वचनादानविसर्गागमनानंदात्मने
औं कनिष्ठिकाभ्यां वौषट् ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ळं क्षं
मनोबुद्ध्यहंकारचित्तात्मने अः करतलकरपृष्ठाभ्यां फट्

इति करन्यासः ॐ आं ह्रीं क्रौं अं कं खं गं घं ङं आकाशवाय्वग्नि
सलिलपृथिव्यात्मने आं हृदयाय नमः ॐ आं ह्रीं क्रौं इं चं छं जं
झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा ॐ आं ह्रीं क्रौं
उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्
ॐ आं ह्रीं क्रौं एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं कव
चाय हुं ॐ आं ह्रीं क्रौं ओं पं फं बं भं मं वचनादानविसर्गगमनान
न्दात्मने औं नेत्रत्रयाय वौषट् ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं
मनोबुद्ध्यहङ्कारचित्तात्मने अः अस्त्राय फट् इति षडङ्गः ॐ ना
भ्यादिपादपर्यन्तं आं नमः हृदयादिनाभ्यन्तं ह्रीं नमः मूर्धादि
हृदयान्तं क्रौं नमः हृदयकमलमध्ये यं त्वगात्मने नमः पूर्व
दले रं असृगात्मने नमः पश्चिमदले लं मांसात्मने नमः आ
ग्नेयदले वं मेदसात्मने नमः वायव्यदले शं अस्थ्यात्मने नमः
ईशानदले षं मज्जात्मने नमः नैरृतिदले सं शुक्रात्मने नमः
उत्तरदले हं प्राणात्मने नमः दक्षिणदले लं जीवात्मने नमः पुनः
कर्णिकायां क्षं परमात्मने नमः इति विन्यसेत् अथ ध्यानं ॐ र
क्ताब्धिपोतारुणपद्मसंस्थां पाशाङ्कुशौ विक्षुशरासबाणान्
शूलं कपालं दधतीं कराब्जै रक्तां त्रिनेत्रां प्रणमामि देवीं इति ध्या
त्वा हृदि हस्तं निधाय प्राणप्रतिष्ठां कुर्यात् ॐ आं ह्रीं क्रौं यं रं
लं वं शं षं सं हं ह्रौं हंसः सोऽहं मम प्राणा इह प्राणाः ॐ मम जी
व इह स्थितः ॐ मम सर्वेन्द्रियाणि इह स्थितानि ॐ मम वाङ्म
नश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा
इति प्राणप्रतिष्ठां त्रिः सकृद्वा जप्त्वा निजवपुर्ज्योतिर्मयं ध्यात्वा

भु. प. १२ 12

स्वमूलऋष्यादिस्मरणं कुर्यात् यथा ॐ अस्य श्रीभुवने
श्वरीमंत्रराजस्य श्रीशक्तिऋषिः गायत्रीछंदः श्रीभुवने
श्वरीदेवता ह्रीं बीजं ऐं शक्तिः श्रीं कीलकं श्रीधर्मार्थकाम
मोक्षार्थे न्यासे विनियोगः इति कृतांजलिः स्पृत्वा न्यसेत् श्रीश
क्तिऋषये नमः शिरसि गायत्रीछंदसे नमः मुखे श्रीभुवने
श्वरीदेवतायै नमः हृदि ह्रीं बीजाय नमः गुह्ये ऐं शक्तये नमः
पादयोः श्रीं कीलकाय नमः नाभौ मम श्रीधर्मार्थकाममोक्षा
र्थे न्यासे विनियोगः सर्वांगेषु इति ऋष्यादिन्यासः अथ करन्या
सः ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्यां वषट्
ह्रैं अनामिकाभ्यां हुं ह्रौं कनिष्ठिकाभ्यां वौषट् ह्रः करतलकर
पृष्ठाभ्यां फट् इति करन्यासः अथ षडंगः ह्रां हृदयाय नमः ह्रीं
शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुं ह्रौं नेत्राभ्यां वौषट्
ह्रः अस्त्राय फट् इति स्वमूलऋष्यादिकरषडंगन्यासं कृत्वा
अंतर्मातृकान्यासं कुर्यात् यथा ततः आदौ मातृकाप्राणाया
मो यथा अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति पूरकः कं खं
गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं इति कुंभकः
यं रं लं वं शं षं सं हं ळं क्षं इति रेचकः इति विरचय्य मातृकाऋष्या
दिस्मरणं विदधीत यथा ॐ अस्य श्रीअंतर्मातृकान्यासस्य ब्रह्मा
ऋषिः अव्यक्तगायत्रीछंदः श्रीअंतर्मातृकासरस्वतीदेवता
हलो बीजानि स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीभुवनेश्व
र्यंगत्वेनांतर्मातृकान्यासे विनियोगः इति कृतांजलिः स्पृत्वा न्य
सेत् ॐ ब्रह्मऋषये नमः शिरसि अव्यक्तगायत्रीछंदसे नमः

मुखे श्रीअन्तर्मातृकासरस्वतीदेवतायै नमः हृदि हल्भ्यो
बीजेभ्यो नमः गुह्ये स्वरः शक्तिभ्यो नमः पादयोः अव्यक्तकी
लकाय नमः नाभौ मम श्रीभुवनेश्वर्यंगत्वेन न्यासे विनियोगः
इति ऋष्यादिन्यासः अथ करन्यासः ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं
आं अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा
ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् ॐ ऐं ह्रीं श्रीं एं तं थं दं पे
धं नं ऐं अनामिकाभ्यां हुं ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं कनिष्ठि
काभ्यां वौषट् ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं क्षं अः करतल
करपृष्ठाभ्यां फट् इति करन्यासः अथ षडंगः ॐ ऐं ह्रीं श्रीं अं कं खं
गं घं ङं आं हृदयाय नमः ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसे स्वा
हा ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं शिखायै वषट् ॐ ऐं ह्रीं श्रीं एं तं थं दं
धं नं ऐं कवचाय हुं ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं नेत्राभ्यां वौषट्
ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं क्षं अः अस्त्राय फट् इति षडंगः
अथ ध्यानं ॐ व्योमेन्द्वोरसनाणिकर्णिकमचां हे हैः स्फुरत्केसरं
पत्रान्तर्गतवर्गपंचयशलाणिदिग्विवर्गक्रमात् आशास्व
स्रिश्वलान्तलागलिपुजातत्तोणीपुरीणा वृतं वर्णाब्जं शिरसि
स्थितं विषगदप्रध्वंसिमृत्युंजयं इति वर्णकमलं शिरसि ध्या
त्वा मूलाधारस्थितं सुप्तां ब्रह्मशाखिकुंडली ज्वलत्पाव
कसंकाशां सूक्ष्मतेजःस्वरूपिणीं मूलाधाराच्छिरःपद्मं स्पृ
शन्तीं विद्युदाकृतिं तया स्पृष्टशिरःपद्मादमृतेनोच्चस्वरूपिणः
निर्गता मातृकावर्णान्सुषुम्णावर्त्मनान्तः व्यापयित्वा स्थि
तान्सर्वांस्तेनैव ध्यात्वा प्रविन्यसेत् इत्यन्तर्मातृकाच ध्यात्वा न्यसे।

भु. यथा अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠं
प. नमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः
१३ इतिकंठेषोडशदले ध्यानेनन्यसेत् कंनमः खंनमः गंनमः घं
नमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठंनमः
13 इत्यनाहते द्वादशदले डंनमः ढंनमः णंनमः तंनमः थंनमः दंन
मः धंनमः नंनमः पंनमः फंनमः इतिनाभौ दशदले बंनमः भंनमः
मंनमः यंनमः रंनमः लंनमः इतिलिंगमूले षट्दले वंनमः शं
नमः षंनमः संनमः इतिमूलाधारे चतुर्दले हंनमः क्षंनमः इ
तिभ्रूमध्ये द्विदले इतिमूलांतर्मातृकान्यासः अथसृष्टिक्रमे
णांतर्मातृकान्यासः वंनमः शंनमः षंनमः संनमः इतिमूला
धारेचतुर्दले बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः इ
तिस्वाधिष्ठाने षट्दले डंनमः ढंनमः णंनमः तंनमः थंनमः
दंनमः धंनमः नंनमः पंनमः फंनमः इतिमणिपूरे दशदले कं
नमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झं
नमः ञंनमः टंनमः ठंनमः इत्यनाहते द्वादशदले अंनमः
आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः
ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः इति
विशुद्धौ कंठे हंनमः क्षंनमः इत्याज्ञाचक्रे इतिसृष्टिक्रमेणां
तर्मातृकान्यासः अथस्थितिक्रमः डंनमः ढंनमः णंनमः
तंनमः थंनमः दंनमः धंनमः नंनमः पंनमः फंनमः इतिम
णिपूरे नाभौ बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः इ
तिस्वाधिष्ठाने लिंगमूले वंनमः शंनमः षंनमः संनमः इति

मूलाधारे हंनमः क्षंनमः इत्याज्ञाचक्रे अंनमः आंनमः इंनमः
ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐं
नमः ओंनमः औंनमः अंनमः अःनमः इतिविशुद्धौ कंनमः खंनमः
गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंन
मः ठंनमः इत्यनाहते इतिस्थितिक्रमेणांतर्मातृकान्यासः अथ
संहारक्रमः हंनमः क्षंनमः इत्याज्ञाचक्रे वंनमः शंनमः षंनमः
संनमः इतिमूलाधारे बंनमः भंनमः मंनमः यंनमः रंनमः लंन
मः इतिस्वाधिष्ठाने डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः
धंनमः नंनमः पंनमः फंनमः इतिमणिपूरे कंनमः खंनमः गंनमः
घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठं
नमः इत्यनाहते अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः
ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः
अंनमः अःनमः इतिविशुद्धौ इतिसंहारक्रमेणांतर्मातृकान्या
सः अथबहिर्मातृकान्यासः तत्रऋष्यादिकंमंतर्मातृकावदेव
ध्यानंकुर्यात् यथा ॐपंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्
कुक्षिवक्षो देशांभास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदा
तां अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणांपद्मसंस्था म
च्छाकल्पामतुच्छस्तनजघनभरां भारतीं तांनमामि इतिध्या।
त्वामनसासंपूज्य ॐ ह्रीं अंनमः ॐ ह्रीं आंनमः ॐ ह्रीं इंनमः ॐ
ह्रीं ईंनमः ॐ ह्रीं उंनमः ॐ ह्रीं ऊंनमः ॐ ह्रीं ऋंनमः ॐ ह्रीं ॠंनमः
ॐ ह्रीं ऌंनमः ॐ ह्रीं ॡंनमः ॐ ह्रीं एंनमः ॐ ह्रीं ऐंनमः ॐ ह्रीं ओंनम :
ॐ ह्रीं औंनमः ॐ ह्रीं अंनमः ॐ ह्रीं अःनमः ॐ ह्रीं कंनमः ॐ ह्रीं खंनमः

ॐ ह्रीं गं नमः ॐ ह्रीं घं नमः ॐ ह्रीं ङं नमः ॐ ह्रीं चं नमः ॐ ह्रीं छं न
मः ॐ ह्रीं जं नमः ॐ ह्रीं झं नमः ॐ ह्रीं ञं नमः ॐ ह्रीं टं नमः ॐ ह्रीं ठं नमः
